दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लद्वादशी
ज्येष्ठ 13 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-214 | 1 | मई 27, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 द्वयोः प्रकरणयोः त्रयः प्रमुखाः 'चिट्टा' यूथपाः निगृहीताः, पृष्ठसम्बद्धतायाम् शिमला-आरक्षकदलाय महत् साफल्यम्

3 सर्वजिलामुख्यालयानां चतुर्लेनमार्गेण सह संयोजनं कर्तव्यम्- मुख्यमन्त्रिणः निर्देशाः एक्सप्रेस-वे, राष्ट्रीयराजमार्गाः, राज्यराजमार्गाः च तीव्रगत्या गुणवत्तापूर्वकं शीघ्रं पूर्णीकर्तव्याः

5 वैदिकपरम्परायाम् अधिकमासस्य सामाजिक-आध्यात्मिक-शास्त्रीयमहत्त्वविषये राष्ट्रिय ई-संगोष्ठी सुसम्पन्ना

# विदेश-मन्त्री डा. एस्. जयशङ्करः नव दिल्ल्यां क्वाड्-विदेश-मन्त्रिणां सभायाः अध्यक्षता कृतवान्



विदेश-मन्त्री डा. एस्. जयशङ्करः नव दिल्ल्यां क्वाड्-विदेश-मन्त्रिणां सभायाः अध्यक्षः अभवत्। आस्ट्रेलिया-देशस्य विदेशमन्त्री पेनी वोङ्गः, जपान-देशस्य विदेशमन्त्री तोशिमित्सु मोटेगी, अमेरिकादेशस्य विदेशसचिवः मार्को रुबियो च अस्यां सभायां भागं भजितवन्तः। सभायाः अनन्तरं संयुक्त-वार्ताहर-सम्मेलनम् अभिसंबोधयन्, डा. जयशङ्करः, क्वाड-राष्ट्रेषु सहयोगं सुदृढी करणाय, परस्परं साहाय्यं कर्तुं च अवधानं दत्तवान्। सः अवदत् यत्, क्वाड्-देशाः मुक्तसमाजाः सन्ति ये समृद्धः विकासस्य च अन्वेषणे नवान्वेषणं सृजनात्मकतां च पोषयन्ति। डॉ. जयशङ्करः अवधानं दत्तवान् यत् भारत-प्रशान्तप्रदेशः वैश्विकवृद्धेः स्थिरतायाः च चालकः भवेत्। सः अवदत् यत् समुद्रीय-लोकतन्त्ररूपेण, बहुवादी-समाजरूपेण, आपण-अर्थव्यवस्थारूपेण च क्वाड-राष्ट्राः स्वतन्त्रं मुक्तं च हिंद-प्रशान्त-प्रदेशं प्रति दायित्वं वहन्ति। स्वस्य वक्तव्ये, अमेरिकादेशस्य विदेशसचिवः मार्को रुबियो इत्येषः अकथयत् यत् संयुक्तराज्यम् अस्य वर्षस्य अन्ते क्वाड्-सहभागिभ्यः इन्धन-सुरक्षा-मञ्चस्य कृते आतिथेयत्वं करिष्यति येन अस्य विस्तारः अधिकं भवेत्। क्वाड्-देशाः दृढमूल्यानि, सम्बद्ध-हितानि च धारयन्ति इति कथयित्वा सचिवः रुबियोः अवदत् यत् क्वाड्-सहभागितायाः कृते अमेरिका-देशः गभीरतया प्रतिबद्धः अस्ति। जापान-देशस्य विदेशमन्त्री तोशिमित्सु मोटेगी इत्येषः, स्वस्य संयुक्त-वक्तव्ये, होर्मुज़-जलसंधौ स्वतन्त्रं सुरक्षितं च नौपरिवहनं सुनिश्चेतुं तथा पश्चिम-एशियादेशे स्थिरताम् आनेतुं कूटनीतिकप्रयासानां महत्त्वं प्रतिपादितवान्। आस्ट्रेलिया-देशस्य विदेशमन्त्री पेनी वोङ्गः अवदत् यत् क्वाड् इत्यनेन 'क्वाड् पोर्ट्स् आफ् द फ्यूचर पार्टनरशिप्' इत्यस्य माध्यमेन क्वाड-तः प्रशान्त-प्रदेशं प्रति अद्यपर्यन्तं प्रबलं प्रतिबद्धतां घोषितम् अस्ति। क्वाड्-देशाः अपि विधिप्रशासनस्य, सार्वभौमत्वस्य, प्रादेशिक-अखण्डतायाः च रक्षणार्थं स्वस्य प्रतिबद्धतां पुनः दृढीकृतवन्तः। क्वाड्-विदेश-मन्त्रिणां सभया संयुक्त वक्तव्ये उक्तं यत् क्वाड्-देशाः पश्चिम-एशियायाः स्थित्यां चर्चयन् अस्मिन् क्षेत्रे वर्तमानस्य कूटनीतिकप्रयासानां समर्थनम् अपि च चिरस्थायी शान्तेः आशां च पुनः दृढीकृतवन्तः। नौपरिवहन-अधिकाराणां स्वतन्त्रतायाः विषये संयुक्तराष्ट्रसङ्घस्य समुद्र-विधि-सम्मेलनस्य अन्कलोस इत्यस्य प्रतिबिम्बितान्ताराष्ट्रिय-विधि-पालनस्य महत्त्वं, होर्मुज्-जलसंधिं तथा रक्तसमुद्रस्य माध्यमेन वैश्विक वाणिज्यस्य सुरक्षायाः अविरामप्रवाहस्य च महत्त्वं ते पुनरुद्घाटितवन्तः। भारत-प्रशान्त ऊर्जा-सुरक्षायाः विषये स्वस्य वक्तव्ये, भारतं, आस्ट्रेलिया, जपान, संयुक्तराज्यामेरिका च सुसक्रियमाणं, स्थिरं, पारदर्शकं, सुरक्षितं, स्थितिस्थापकत्वं च ऊर्जा-आपणं सुनिश्चेतुं दृढं प्रतिबद्धतां पुनरुद्घाटितवन्तः।

## सुभाषितम्

अहिंसयैव भूतानां,
कार्यं श्रेयोऽनुशासनम्।
वाक्चैव मधुरा श्लक्ष्णा,
प्रयोज्या धर्ममिच्छता।।

यथासंभव बिना किसी प्रकार का कष्ट पहुंचाए ही समस्त प्राणियों को उनके कल्याण के लिए अनुशासन करना चाहिए। जो मनुष्य धर्म की इच्छा रखते हों उनके लिए मधुर एवं श्लक्ष्ण वाणी का प्रयोग करना चाहिए।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## भारत-अमेरिका-देशौ महत्त्वपूर्णानां खनिजानां दुर्लभानां द्वैपाक्षिक-संरचनायां हस्ताक्षरं कृतवन्तौ



भारत-अमेरिका-देशौ महत्त्वपूर्णानां खनिजानां दुर्लभानां भू-तत्त्वानां च आपूर्ति, खननं, प्रक्रियां च सुरक्षितं कर्तुं प्रमुख द्वैपाक्षिक-संरचनायां हस्ताक्षरं कृतवन्तौ। विदेशमन्त्रिणः डा. एस्. जयशङ्करस्य अमेरिकादेशस्य विदेशसचिवस्य मार्को रुबियो इत्यस्य च मध्ये दिल्लीनगरे ऐतिहासिकसमन्वयस्य आदानप्रदानम् अभवत्। विदेश-मन्त्रिणा उक्तं यत् इयं संरचना स्थितिस्थापकान् विविधाः च आपूर्तिशृङ्खलाः सुदृढां करिष्यति।

## केन्द्रीयगृहमन्त्री अमित शाहः 'ऑपरेशन् सिन्दूर' अभियानस्य समये सीमा-सुरक्षाबलस्य भूमिकायाः प्रशंसाम् अकरोत्

केन्द्रीयगृहमन्त्री अमित शाहः 'ऑपरेशन् सिन्दूर' अभियानस्य समये सीमा-सुरक्षाबलस्य भूमिकायाः प्रशंसाम् अकरोत्। सः अवदत् यत् अनेन सैन्य-बलेन न केवलं सीमायाः रक्षणं कृतम्, अपितु सीमावर्ती-जनपदेषु निवसतां जनानां मनोबलम् अपि वर्धितम्। सीमासुरक्षां पूर्णतया सुदृढां कर्तुं सीमा सुरक्षाबलेन प्रशासनं, नागरिकांश्च संयोज्य चतुःस्तरीय-ग्रिड् निर्माणाय श्रीशाहेन विशेषम् अवधानं प्रदत्तम्। श्रीशाहः अद्य बीकानेर-नगरस्य समीपे सीमा सुरक्षाबलस्य 'साञ्चु-पोस्ट्' इत्यत्र आयोजिते प्रहरी-सम्मेलने सम्बोधयन् आसीत्। सः अवदत् यत् अस्याः चतुःस्तरीय-ग्रिड्-व्यवस्थायाः साहाय्येन सीमायाम् उद्भूतानां विभीषिकानां पूर्णशक्त्या प्रतिकारः भविष्यति।

## राष्ट्रपतिः द्रौपदीमुर्मुः सिक्किम-राज्यस्य त्रिदिवसीयायां यात्रायां गङ्गटोक्-नगरं संप्राप्तवती

राष्ट्रपतिः द्रौपदीमुर्मुः सिक्किम-राज्यस्य त्रिदिवसीयायां यात्रायां गङ्गटोक्-नगरं संप्राप्तवती। स्वकीया यात्रावधौ राष्ट्रपतिः महिलानां कृते समर्पितानां पिङ्क्-बस-यानानां उद्घाटनं करिष्यति, यस्य उद्देश्यं राज्ये सुरक्षित-सुलभ-परिवहन-सौकर्येषु परिष्कारः भवेत्। सा सिक्किम्-राज्यस्य समृद्ध पारिस्थितिकं पुष्पपरम्परां च द्रष्टुं रिड्ज्-पार्क- इत्यस्य आर्किडेरियम् अपि गमिष्यति।

## भारतं समेत्य समग्र विश्वात् कोटिशः जनाः सऊदी अरेबिया-देशे हज-यात्रां कुर्वन्तः सन्ति

भारतं समेत्य समग्र विश्वात् कोटिशः जनाः सऊदी अरेबिया-देशे हज-यात्रां कुर्वन्तः सन्ति । ह्यः पञ्चदिवसीय वार्षिक-तीर्थयात्रायाः आरम्भं लक्षशः हज्-तीर्थयात्रिणः मीना-नगरे रात्रिं व्यतीतवन्तः। अधुना ते अराफात-क्षेत्रे मुख्य-हज्-अनुष्ठानार्थं प्रार्थनार्थं च समागच्छन्ति। ते तत्र पूर्णदिनं यापयन्ति, प्रार्थयन्ति च। तीर्थयात्रिणः निमरा मस्जिद इत्यत्र 'खुत्बा-ए-हज' अर्थात् हज-प्रवचनं श्रुतवन्तः। ततः सायंकाले ते मुज़दलिफ़ा- नगरं प्रति प्रस्थानात् प्राक् अपराह्ने सायंकाले च संयुक्तरूपेण प्रार्थनां कुर्वन्ति।

# द्वयोः प्रकरणयोः त्रयः प्रमुखाः 'चिट्टा' यूथपाः निगृहीताः, पृष्ठसम्बद्धतायाम् शिमला- आरक्षकदलाय महत् साफल्यम्



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे मादकद्रव्याणां विरुद्धं सञ्चालिते विशेष-अभियाने शिमला-आरक्षकदलाय (पुलिस) महत् साफल्यं प्राप्तम्। आरक्षकदलेन द्वयोः भिन्न-प्रकरणयोः पृष्ठसम्बद्धतायाः (बैकवर्ड लिंकेज) आधारेण कार्यविधिं कृत्वा बाह्यराज्येभ्यः त्रयः प्रमुखाः 'चिट्टा' (मादकद्रव्य) प्रदातृ-यूथपाः निगृहीताः। आरक्षकदलेन पूर्वं द्वौ अभियुक्तौ निगृहीतौ आस्ताम्, ययोः विस्तृतान्वेषणस्य पृष्ठसम्बद्धतायाः च आधारेण आरक्षकदलेन 'चिट्टा' द्रव्यस्य ३ प्रमुखाः मुख्यसूत्रधाराः (किंगपिन) धृताः।

## आपणस्य ग्राहकाणाम् माध्यमेन एव धनं स्थानन्तरितं कारयति स्म अभियुक्तः

शिमला-नगरस्य ए. एस. पी. (ASP) अभिषेकः न्यवेदयत् यत् प्रथमे प्रकरणे १८ मई दिनाङ्के संजौली- आरक्षकस्थानकस्य (पुलिस थाना) आरक्षकदलेन संजौली-निवासी रविकुमारः उर्फ बंटी (आयुः ३५ वर्षाणि) निगृहीतः आसीत्। अभियुक्तस्य आधिपत्यात् आरक्षकदलेन २६ ग्राममितं 'चिट्टा' द्रव्यं प्राप्तम्। अस्मिन् अन्तराले आरक्षकदलेन अभियुक्तस्य पृष्ठसम्बद्धतायाः, तान्त्रिकसाक्ष्याणां वित्तीय-व्यवहारस्य च विवृतं निरीक्षणं कृतम्। निरीक्षणे प्रकटितं यत् अभियुक्तः एकः आपणिकः आसीत् तथा च स्व आपणं प्रति आगच्छताम् ग्राहकाणां विभिन्नानां क्यू. आर. स्कैनर माध्यमेन धनं स्थानान्तरितं कारयति स्म। अस्य धनस्य उपयोगः मादकद्रव्याणां क्रयणाय क्रियते स्म, यदा तु धनं स्थानान्तरयितृभ्यः ग्राहकेभ्यः अस्य ज्ञानं नासीत्।

## अमृतसरतः निगृहीतः 'चिट्टा' द्रव्यस्य मुख्यः यूथपः:-

ए. एस. पी. अभिषेकः अवदत् यत् अभियुक्तः एतां पद्धतिं मादकद्रव्याणां क्रयणेन सम्बद्धं अङ्कीय- पदचिह्नं (डिजिटल ट्रेल) गोपयितुम् आचरति स्म। अन्वेषणे एतदपि प्राप्तं यत् रविकुमारः तरनतारन- क्षेत्रस्य एकस्मै युवकाय मादकद्रव्य- तस्कर्यै धनं प्रेषयति स्म, यः तस्मै मादकद्रव्यं प्रददाति स्म। अस्याः एव गवेषणायाः आधारेण शिमला- आरक्षकदलेन २२ मई २०२६ दिनाङ्के 'चिट्टा' प्रदातॄणां मुख्यनेता (सरगना) शवनदीपः (आयुः २१ वर्षाणि), निवासी तरनतारन, पञ्जाब, अमृतसरस्य जण्डियाला गुरु इति स्थानात् निगृहीतः। अस्मिन् प्रकरणे अग्रीमा गवेषणा प्रचलन्ती अस्ति।

## पञ्जाब-हरियाणा राज्ययोः प्रचलन्ती आसीत् 'चिट्टा' द्रव्यस्य शृङ्खला

शिमलानगरस्य ए. एस. पी. अभिषेकः अवदत् यत् द्वितीये प्रकरणे बालूगञ्ज-आरक्षकस्थानकस्य आरक्षकदलेन १८ मई २०२६ दिनाङ्के सोलन- जनपदस्य बसाल-निवासी जय-सिङ्गला (आयुः २३ वर्षाणि) 'चिट्टा' तस्करी-आरोपे निगृहीतः आसीत्। अभियुक्तस्य आधिपत्यात् १४ ग्राममितं 'चिट्टा' द्रव्यस्य प्राप्तिः अभवत्। अभियुक्तं निगृह्य आरक्षक-.अभिरक्षा (पुलिस रिमांड) प्राप्ता, पृष्ठसम्बद्धतायाः आपूर्ति-शृङ्खलायाः (सप्लाई चेन) च अन्वेषणाय पृच्छा, अङ्कीयसाक्ष्याणां (डिजिटल साक्ष्य) वित्तकोश-अभिलेखानां (बैंक रिकॉर्ड) च गवेषणा कृता। गवेषणायां सम्मुखम् आगतं यत् अस्य मादकद्रव्यसमूहस्य प्रदाता मोगा-निवासी अमृतपालः अस्ति, यः हरियाणा-राज्यस्य कुलदीपेन सह मिलित्वा तन्त्रं (नेटवर्क) सञ्चालयति स्म। कुलदीपः अमृतपालस्य कृते 'चिट्टा' द्रव्यस्य आपूर्तिं (डिलीवरी) करोति स्म।

# सेवानिवृत्तेः चतुर्दिनपूर्वं संजयगुप्तवर्याय प्राप्ता प्रसादी, सर्वकारेण नियमिते मुख्यसचिवपदे कृता नियुक्तिः

हिमसंस्कृतवार्ताः- शिमला। हिमाचलसर्वकारेण कार्यवाहक-मुख्यसचिवः संजयगुप्तः नियमित-मुख्यसचिवपदे नियुक्तः। एतद्विषये कार्मिकविभागस्य सचिवेन मंगलवासरे आदेशाः प्रसारिताः। काङ्ग्रेस-सर्वकारेण मुख्यसचिवाय संजयगुप्तवर्याय सेवानिवृत्तेः चतुरः दिवसान् पूर्वम् एषः प्रसादी (उपहारः दत्तः।) संजयगुप्तः ३१ मई दिनाङ्के सेवानिवृत्तः भवितुम् गच्छन् अस्ति। अपरपक्षे, हिमाचलप्रदेशसर्वकारेण अमरजीतसिंहः, आई. ए. एस. (HP:२०१०), यः सम्प्रति सचिव (सहकारिता) पदे कार्यं कुर्वन् अस्ति, तस्मै नगर एवं देशीययोजना तथा आवास विभागस्य अतिरिक्तः प्रभारः समर्पितः।

## मण्डी- बिलासपुरयोः मतपत्राणाम् अन्तर्धानप्रकरणे द्वौ अपि ए. आर. ओ. इति दोषारोपपत्रितौ

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे मङ्गलवासरे पञ्चायतीराजनिर्वाचनाय प्रथम-चरणस्य मतदानं प्रारब्धम्। प्रदेशस्य १२९३ (त्रयोदशाधिक-द्वादशशत) पञ्चायतेषु मङ्गलवासरे प्रथमचरणस्य मतदानं प्रातः ७ वादने आरब्धम्, यस्मिन् सुरक्षायाः दृढाः प्रबन्धाः कृताः आसन्। प्रातःकालादेव विभिन्नेषु पञ्चायतेषु वृद्धाः मतदातारः मतदानं कर्तुं प्राप्नुवन्ति स्म। शनिवासरे पञ्चायतीराज-निर्वाचनस्य अन्तिमचरणं पूर्णं भविष्यति तथा च रविवासरे जिलापरिषद् एवं बी. डी. सी. (BDC) प्रत्याशिनां निर्वाचन-परिणामाः घोषयिष्यन्ते। प्रातःकाले विभिन्नेषु मतदानकेन्द्रेषु मतदातॄणां दीर्घाः पङ्क्तयः अपि दृष्टाः। ईदृशे समये पञ्चायतीराजनिर्वाचने वृद्धमतदातॄणाम् उत्साहः अधिकः दृष्टः। मण्डी-बिलासपुरयोः मत-पत्राणाम् अन्तर्धानप्रकरणे द्वौ अपि ए. आर. ओ. (ARO) दोषारोपपत्रितौ। करसोगे ए. आर. ओ. विरुद्धं कार्यविधिः भविष्यति, दोषारोपपत्रस्य सज्जता वर्तते। ५ मतदानानि अभवन्, ६ संङ्ख्यायां प्रत्याशीसमर्थकः मतदानं कर्तुम् आगतः। सः अवदत् यत् प्रत्याशिनः नाम मतपत्रे नास्ति।

# चिनाब- ब्यास- सम्पर्क- सुरङ्ग- परियोजनायै केन्द्रसर्वकारस्य स्वीकृतिः सिन्धुजलसन्धेः निलम्बनात् परं स्वीकृतं महत् पदम्




**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** लाहौल-क्षेत्रे चन्द्रानद्याः अतिरिक्तजलं ब्यास-द्रोणीं (बेसिन) प्रति परिवर्तयितुं बहुचर्चितायां चिनाब- ब्यास- सम्पर्क- सुरङ्ग-परियोजनायां केन्द्रसर्वकारः शीघ्रमेव कार्यं प्रारब्धुं शक्नोति। चिनाब- ब्यास- सम्पर्क- सुरङ्ग- परियोजनायै स्वीकृतिः सिन्धुजलसन्धेः निलम्बनात् परं केन्द्रस्य महत् पदं मन्यते। परियोजनां परितः नवदेहल्यां वेगेन गतिविधयः वर्धिताः सन्ति, यदा तु आधिकारिक- घोषणायाः प्रतीक्षा क्रियते। परियोजनान्तर्गतं कोकसर-क्षेत्रे पीरपञ्जाल-पर्वतस्य अधः २,३५२ कोटिरूप्यकाणां व्ययेन प्रायः ८.७ किलोमीटरदीर्घा सुरङ्ग-प्रणाली प्रस्ताविता अस्ति। अस्यां परियोजनायां अवसाद- प्रबन्धनप्रणाल्यां च प्रायः २,६०० कोटिरूप्यकाणि व्ययीभविष्यन्ति। एतेन सह लाहौल-घाट्यां चन्द्रानद्यां १९ मीटरोन्नतस्य जलरोधकस्य निर्माणस्यापि योजना वर्तते, येन माध्यमेन जलप्रवाहं नियन्त्र्य सुरङ्गप्रणाल्यां परिवर्तयिष्यते। सूत्राणाम् अनुसारम् एषा सम्पूर्णा परियोजना जलं हाइड्रोलिक- संरचनायाः सुरङ्ग-जालस्य च माध्यमेन ब्यास-द्रोणीं प्रति नयनस्य व्यापकयोजनायाः भागः अस्ति। अनेन हिमाचलप्रदेशे जलविद्युत्-उत्पादनक्षमतायां उल्लेखनीयवृद्धेः सम्भावना प्रकटीक्रियते, या प्रायः ४,००० मेगावाट-पर्यन्तम् अतिरिक्त-उत्पादनस्य आधारः भवितुं शक्नोति।

एषा योजना सिन्धुजलसन्धेः (१९६०) अन्तर्गतं पश्चिमीनदीनां जलस्य उपयोगस्य अनुमत्या सह सम्बद्धा कथ्यते। विदुषां मतं वर्तते यत् यदि एषा परियोजना धरातले अवतरति, तर्हि अस्याः प्रभावः जलप्रबन्धने, सेचने, विद्युदुत्पादने च भविष्यति। तथापि, पर्यावरणीय-भौगोलिक-पक्षेषु विस्तृतम् अध्ययनम् आवश्यकं भविष्यति।

## राष्ट्रीयहितान् सुदृढीकर्तुं सुवर्णपदक्षेपः

चिनाब- ब्यास- सम्पर्क- सुरङ्ग- परियोजना हिमाचलेन सह सम्पूर्ण-उत्तरभारतस्य कृते लाभप्रदा अस्ति। परियोजना देशं जल- ऊर्जाक्षेत्रयोः आत्मनिर्भरतायाः दिशि अग्रे नेष्यति। 'ऑपरेशन सिन्दूर' इत्यनेन तथा पाकिस्तानेन सह सिन्धुजलसन्धेः निलम्बनात् परं सर्वकारस्य एतत् पदं राष्ट्रीयहितान् अधिकं सुदृढीकर्तुं साहाय्यकं सिद्धं भविष्यति।

-अनुरागसिंहठाकुरः, सांसदः

# सर्वजिलामुख्यालयानां चतुर्लेनमार्गेण सह संयोजनं कर्तव्यम्- मुख्यमन्त्रिणः निर्देशाः

## एक्सप्रेस-वे, राष्ट्रीयराजमार्गाः, राज्यराजमार्गाः च तीव्रगत्या गुणवत्तापूर्वकं शीघ्रं पूर्णीकर्तव्याः



**हिमसंस्कृतवार्ताः- राघव नाथ झा।** लोकसेवकनिवासस्थिते “1 अणे मार्ग” नामके ‘संकल्प’- सभागारे पथनिर्माणविभागस्य समीक्षासत्रं कुर्वन् माननीयमुख्यमन्त्री सम्राटचौधरीमहोदयः निर्देशितवान् यत् राज्यस्य सर्वे जिलामुख्यालयाः अनिवार्यतया चतुर्लेनमार्गेण संयोजनीयाः। तेन उक्तं यत् राज्ये निर्माणाधीनाः एक्सप्रेस-वे, राष्ट्रीयराजमार्गाः, राज्यराजमार्गाः च तीव्रगत्या गुणवत्तापूर्वकं शीघ्रमेव पूर्णीकर्तव्याः, कार्येषु कापि शिथिलता न भवेत्। मुख्यमन्त्रिणा निर्देशितं यत् राज्यस्य पर्यटनस्थलानि, सांस्कृतिकविरासत्स्थानानि, औद्योगिककोरिडोराः, विशेषकृषिउत्पादनक्षेत्राणि, प्रमुखवाणिज्यकेन्द्राणि च उत्तमसड़कसंयोजनेन योजनीयानि, येन राज्यस्य सर्वाङ्गीणविकासः, औद्योगिकविस्तारः तथा रोजगारसृजनं च तीव्रतया सम्भवेत्।

तेन पुनः निर्देशितं यत् सेतूनां गुणवत्ता तथा स्थायित्वं निरन्तरं परीक्षणीयं, ब्रीज- मेंटेनेंस- नीतेः प्रभावी क्रियान्वयनं च अवश्यं कर्तव्यम् इति। मुख्यमन्त्रिणा उक्तं यत् राज्ये सुदूरक्षेत्रेभ्यः केवलं पञ्चघण्टाभ्यन्तरे पटनानगरं प्राप्तुं लक्ष्यं निर्धारितम् अस्ति, तदर्थं सुदृढसडकजालस्य निर्माणं तीव्रगत्या क्रियते। तेन विक्रमशीला-सेतोः स्थायी-पुनर्स्थापनकार्यं विशेषज्ञप्रतिवेदनानुसारं शीघ्रं कर्तव्यमिति निर्देशः दत्तः, कच्चीदरगाह- बिदुपुर- षड्लेन-पुलस्य निर्माणकार्यं जुलाईमासस्य प्रथमसप्ताहे अनिवार्यतया पूर्णीकर्तव्यमिति अपि निर्देशितम्। अस्यां सभायां उपमुख्यमन्त्री बिजेन्द्रप्रसादयादवः, पथनिर्माणमन्त्री कुमारशैलेन्द्रः, मुख्यमन्त्रिणः प्रधानसचिवः दीपककुमारः, मुख्यसचिवः प्रत्ययामृतः, विकासायुक्तः मिहिरकुमारसिंहः, पथनिर्माणविभागस्य सचिवः पंकजकुमारपालः, मुख्यमन्त्रिणः सचिवौ लोकेशकुमारसिंहः संजयकुमारसिंहः, बिहारराज्य- सेतुनिर्माण- निगम- लिमिटेडस्य अध्यक्षः डॉ. चन्द्रशेखरसिंहः, बिहार- राज्य- पथ- विकासनिगम- लिमिटेडस्य प्रबन्धनिर्देशकः शीर्षतकपिलअशोकः तथा भारतीय- राष्ट्रीय- राजमार्ग- प्राधिकरणस्य (एन. एच. ए. आई. ) वरिष्ठाधिकारिणः च उपस्थिताः आसन्।

### कृषकहिताय आयवृद्धये च राज्यशासनस्य दृढसंकल्पः विजयकुमारसिन्हमहोदयः

# कृषकपञ्जीकरणेन योजनालाभस्य प्रत्यक्षप्राप्तिः, कृषिव्यवस्थायाः पारदर्शिता च सुनिश्चिता भविष्यति



## शारदीयखरीफमहाभियान-2026 समीक्षासभा सम्पन्ना

**हिमसंस्कृतवार्ता, राघव नाथ झा।** बिहारराज्यस्य माननीयकृषिमन्त्री श्रीविजयकुमारसिन्हमहोदयेन प्रोक्तं यत् राज्यशासनं कृषकाणाम् आयवृद्धये, कृषिव्यवस्थायाः आधुनिकीकरणाय, कृषिकार्यस्य च लाभकारीव्यवसाय-रूपपरिवर्तनाय निरन्तरं दृढसंकल्पेन कार्यं करोति।तेन उक्तं यत् शासनस्य मूललक्ष्यं कृषकान् आधुनिकप्रौद्योगिक्या, सुलभविपणनव्यवस्थया, पारदर्शिन्याः प्रशासनिकव्यवस्थायाश्च सह संयोज्य कृषि-क्षेत्रे व्यापकपरिवर्तनं साधयितुमस्ति।

माननीयमन्त्री अद्य मीठापुरस्थिते कृषिविभागीयकार्यालये आयोजितायां शारदीय-खरीफमहाभियान-2026 विषयक-समीक्षासभायां अध्यक्षतां कुर्वन् अवदत् यत् “लैबतः लान्डपर्यन्तम्” इति वैज्ञानिकदृष्ट्या कृषकसहकार्यं वर्धनीयम्, येन कृषकाः स्वकीयफसलानां समुचितं लाभं प्राप्नुयुः तथा जैविककृषेः विस्तारः भवेत्, यतः तेन पर्यावरणसंरक्षणं, भूमेः उर्वराशक्तिवर्धनं च सम्भवति।सभायां तेन विशेषतया निर्देशितं यत् राज्ये कृषकपञ्जीकरणाभियानम् आरब्धम् अस्ति, येन कृषकाणां सम्यक् दत्तांशव्यवस्था भवति तथा शासकीययोजनानां लाभः प्रत्यक्षरूपेण पात्रकृषकेभ्यः प्राप्यते।

तेन अधिकारिणः प्रति कठोरनिर्देशाः दत्ताः यत् कृषकहितविषये किमपि प्रकारस्य शिथिलता न क्षन्तव्या। शासनस्य शून्यसहिष्णुता-नीतिः भ्रष्टाचार-अनियमितता-विरुद्धं दृढतया प्रवर्तते इति अपि स स्पष्टीकृतवान्।कृषिमन्त्री उक्तवान् यत् बिहारराज्यं कृषिप्रधानराज्यत्वेन आधुनिककृषेः, सिंचनव्यवस्थायाः, जैविककृषेः, फसलविविधीकरणस्य च क्षेत्रे विशेषप्रयत्नं कुर्वत् अस्ति। शासनं कृषकान् नवीनप्रौद्योगिक्या सह संयोज्य कृषिउत्पादानां सुदृढविपणनव्यवस्थां च विकसितुं प्रयतते।तेन पुनः प्रतिपादितं यत् कृषकाणाम् आयवृद्धिः, ग्रामीण-अर्थव्यवस्थायाः सुदृढीकरणं च शासनस्य प्रमुखं ध्येयम् अस्ति। अतः कृषकाणां समस्याः त्वरिततया निवारणीयाः, योजनानां लाभः च अन्तिमकृषकपर्यन्तं निश्चिततया प्रापणीयः इति तेन निर्देशितम्।

अन्ते माननीयमन्त्री विजयकुमारसिन्हमहोदयः विश्वासं प्रकटितवान् यत् कृषकसहयोगेन शासनस्य योजनानां प्रभावीक्रियान्वयनेन च बिहारराज्यं कृषिक्षेत्रे नूतनां कीर्तिं प्राप्स्यति, तथा कृषकाणां जीवनस्तरः उच्चीकृतः भविष्यति।

# प्रत्येकगृहे शुद्धपेयजलस्य

## निरन्तरनिर्बाधापूर्तये मुख्यमन्त्रिणः निर्देशाः

## पेयजलापूर्तेः समयवृद्धिः, गुणवत्तानिरीक्षणं, भूजलसंरक्षणं च विशेषतया करणीयम्



**हिमसंस्कृतवार्ता, राघव नाथ झा।** मुख्यमन्त्री श्रीसम्राटचौधरीमहोदयेन लोकसेवकनिवासस्थिते “एक-अणे-मार्ग”-नामके ‘संकल्प’-सभागारे लोकस्वास्थ्याभियन्त्रणविभागस्य समीक्षासभा सम्पन्ना। अस्यां सभायां लोकस्वास्थ्याभियन्त्रणविभागस्य प्रधानसचिवः श्रीराजेशकुमारमहोदयः प्रस्तुतीकरणमाध्यमेन विभागीयकार्याणामद्यतनस्थितिं भाविकार्ययोजनां च विस्तरेण अवगतवान्। तेन जलापूर्तियोजनानां सञ्चालनम्, अनुरक्षणम्, सम्पोषणम्, पेयजलस्य गुणवत्तापरीक्षणं च विषये विस्तृतविवरणं प्रस्तुतम्। सभायां मुख्यमन्त्री उक्तवान् यत् “गृहे गृहे नलजलयोजना” माध्यमेन जनसामान्याय शुद्धपेयजलस्य आपूर्ति क्रियते। अतः प्रातःसायंकालयोः पेयजलापूर्तेः समयसीमा एकैकघण्टया वर्धनीया, येन सर्वेषां कृते निरन्तरं जलोपलब्धता सुनिश्चितीभवेत्।तेन निर्देशितं यत् पेयजलस्य गुणवत्ताया निरीक्षणं पर्यवेक्षणं च सततं क्रियताम्। प्रत्येकद्वित्रिमासेषु पंचायतस्तरे परीक्षणं भवेत् तथा वार्डस्तरेऽपि निरीक्षणव्यवस्था सुदृढा क्रियताम्। जनानां पेयजलसम्बद्धशिकायतानां त्वरितसमाधानं करणीयम्। अस्य कृते कृत्रिमबुद्धेः उपयोगोऽपि करणीय इति तेन निर्दिष्टम्। मुख्यमन्त्रिणा जलापूर्त्युपकरणानां सम्यगनुरक्षणं मरम्मतिः च विशेषतया करणीयेत्युक्तम्। यत्र आवश्यकता वर्तते तत्र 30 जूनपूर्वं नवीननलकूपानां स्थापना क्रियतामिति निर्देशः प्रदत्तः।भूजल-संरक्षणसम्बद्धाः योजनाः अधिकप्रभावीरीत्या क्रियान्विताः भवेयुरिति मुख्यमन्त्रिणा निर्दिष्टम्। भूजलस्तरस्य सततमवलोकनं विभागेन क्रियताम् तथा तदनुरूपा कार्ययोजना निर्माय कार्याणि सम्पाद्यन्तामिति अपि निर्देशः प्रदत्तः। अस्यां सभायां लोकस्वास्थ्याभियन्त्रणमन्त्री श्रीसंजयकुमारसिंहमहोदयः, मुख्यमन्त्रिणः प्रधानसचिवः श्रीदीपककुमारमहोदयः, मुख्यसचिवः श्रीप्रत्ययामृतमहोदयः, विकासायुक्तः श्रीमिहिरकुमारसिंहमहोदयः, लोकस्वास्थ्याभियन्त्रणविभागस्य प्रधानसचिवः श्रीराजेशकुमारमहोदयः, मुख्यमन्त्रिणः सचिवः श्रीलोकेशकुमारसिंहमहोदयः, सचिवः श्रीसंजयकुमारसिंहमहोदयः, विशेषसचिवः श्रीसञ्जीवकुमारमहोदयः तथा अन्ये वरिष्ठाधिकारीणः उपस्थिताः आसन्।

# साहित्यक्षेत्रे भारतरत्नपण्डितजवाहरलाल नेहरूमहोदयस्य अवदानम्



साहित्य अकादेमी

## (पुण्यतिथिविशेषः)

डॉ. विमलेश झा,गंगौली, राजे, मधुबनी, बिहार

साहित्यक्षेत्रे आधुनिकभारतस्य शिल्पिना, प्रथमप्रधानमन्त्रिणा, भारतरत्नेन पण्डित जवाहरलालनेहरूमहोदयेन यत् अभूतपूर्वम्, कालजयी च योगदानं दत्तं, तत् न केवलं राजनैतिकदृष्ट्या अपि तु वाङ्मयदृष्ट्यापि अनर्घ्यं रत्नम् अस्ति। नेहरूवर्यः केवलं महान् राजनेता, स्वाधीनतासेनानी, कूटनीतिज्ञः च नासीत्, अपि तु सः गम्भीरविद्वान्, सहृदयः कवेः संवेदनशीलतायुक्तः लेखकः, इतिहासकारः, उच्चस्तरीयः साहित्यकारश्च आसीत्। तस्य भाषाशैली, विचाराणां गाम्भीर्यम्, इतिहासदर्शनं च तं विश्वसाहित्ये एकं विशिष्टं स्थानं यच्छति। यद्यपि तेन स्वरचनाः मुख्यरूपेण आङ्ग्लभाषायां लिखिताः, तथापि तस्य रचनासु भारतीयसंस्कृतिः, इतिहासः, दर्शनं, राष्ट्रियचेतना च आसन्। तस्य ग्रन्थानां अनुवादः संसारस्य प्रायः सर्वासु प्रमुखासु भाषासु (संस्कृते अपि) अभवत्।

अत्र साहित्यक्षेत्रे पण्डितनेहरूमहोदयस्य विस्तृतं योगदानं, तस्य प्रमुखरचनाः, विचारधारा, साहित्यिकविशेषताः च अत्र वयं चर्चां कुर्मः।

### १. जीवनवृत्तं साहित्यिकपृष्ठभूमिश्च

जवाहरलालनेहरूवर्यस्य जन्म १८८९ तमे वर्षे नवम्बरमासस्य चतुर्दशदिनाङ्के प्रयागराजस्य (इलाहाबाद) एकस्मिन् समृद्धे सारस्वत- ब्राह्मणपरिवारे अभवत्। तस्य पिता पण्डित मोतीलालनेहरूः स्वयमेव प्रकाण्डविद्वान् अधिवक्ता च आसीत्। नेहरूवर्यस्य प्रारम्भिकी शिक्षा गृहे एव एंग्लो-भारतीयशिक्षकाणां निर्देशने अभवत्, येन सः आङ्ग्लसाहित्येन सह गभीररूपेण परिचितः अभवत्। पश्चात् सः इंग्लैण्डदेशस्य हैरोविद्यालये गतवान्, ततः परं ट्रिनिटी कॉलेज, कैम्ब्रिजमध्ये उच्चशिक्षां प्राप्तवान्। आङ्ग्लसाहित्यस्य, इतिहासस्य, अर्थशास्त्रस्य च गम्भीरमध्ययनं तस्य लेखनशैल्यां स्पष्टं दृश्यते। पाश्चात्य- वैज्ञानिक- दृष्टिकोणस्य भारतीयसांस्कृतिकमूल्यैः सह यः अपूर्वः समन्वयः तस्य साहित्ये दृश्यते, तस्य बीजं तस्य शिक्षायामेव निहितम् आसीत्।

### २. नेहरूमहोदयस्य प्रमुखाः साहित्यिककृतयः

नेहरूवर्यस्य साहित्यं मुख्यरूपेण कारागारवासे (कारागृहे) एव रचितम्। यदा यदा सः स्वाधीनतान्दोलनस्य कारणेन कारागारं गतः, तदा तदा सः स्वसमयस्य सदुपयोगं लेखने कृतवान्। तस्य चतस्रः प्रमुखाः रचनाः विश्वसाहित्यस्य अमूल्यनिधयः सन्तिः

**क) द डिस्कवरी ऑफ इंडिया भारतस्य-** इयं रचना नेहरूमहोदयस्य कीर्तेः मूलाधारः अस्ति। अस्य ग्रन्थस्य रचना सः १९४४ तमे वर्षे अहमदनगरस्य दुर्गकारागारे कारावाससमये कृता। अस्मिन् ग्रन्थे नेहरूमहोदयः सिन्धुसभ्यतायाः आरभ्य आधुनिककालपर्यन्तस्य भारतस्य इतिहासस्य, संस्कृतेः, दर्शनस्य, कलायाः च गम्भीरं विश्लेषणं कृतवान्। सः भारतस्य 'अनेकतायाम् एकताम्' अत्यन्तं सुन्दरेण रूपेण वर्णितवान्। अस्मिन् ग्रन्थे इतिहासः केवलं घटनानां सङ्ग्रहः नास्ति, अपितु एका जीवन्ती सरिता इव प्रवहति। उपनिषदाम्, रामायण- महाभारतयोः, बुद्ध-महावीरयोः, कालिदासस्य, शङ्कराचार्यस्य च विषये तस्य विचाराः तस्य गभीरं दार्शनिकसाहित्यिकज्ञानं दर्शयन्ति।

**ख) विश्वेतिहासस्य दृश्याणि (Glimpses of World History)-** अयं ग्रन्थः वस्तुतः नेहरूमहोदयेन स्वपुत्र्यै इन्दिरायै लिखितानां १९६ पत्राणां सङ्ग्रहः अस्ति। एतानि पत्राणि तेन १९३० तः १९३३ तमवर्षं पर्यन्तं विभिन्नकारागारेभ्यः लिखितानि। अस्मिन् जगदेतिहासस्य महाद्वीपानुसारं वर्णनं वर्तते। एशिया, यूरोप, अमेरिका, अफ्रीका च महाद्वीपानां सभ्यतानां विकासः ह्रासः च अत्र वर्णितः। बाल्यकालस्य कस्यचित् जनस्य कृते इतिहासः कथं रोचकः सरसश्च कर्तुं शक्यते इति अस्य ग्रन्थस्य शैल्या ज्ञायते। इयं सरला, आत्मीया, प्रवाहमयी च शैली अस्ति।

**ग) एकाम् आत्मकथा**

**(An Autobiography/ Toward Freedom)-** १९३४-१९३५ तमे वर्षे कारागारे लिखिता इयम् आत्मकथा नेहरूवर्यस्य साहित्यिकप्रतिभायाः उत्कृष्टम् उदाहरणम् अस्ति।

अस्मिन् केवलं नेहरूवर्यस्य व्यक्तिगतजीवनस्य एव वर्णनं नास्ति, अपितु भारतीयस्वाधीनतासङ्ग्रामस्य जीवन्तः इतिहासः अस्ति। इयं आत्मकथा आत्मप्रशंसायाः दूरे वर्तते। नेहरूमहोदयेन स्वदोषान्, आन्दोलनस्य त्रुटीः, गान्धिमहोदयेन सह मतभेदान् च अत्यन्तं प्रामाणिकतया, तटस्थतया च लिखितम्। विश्वस्य श्रेष्ठतमासु आत्मकथासु अस्याः गणना भवति।

**घ) पितुः पत्राणि पुत्र्यै (Letters from a Father to His Daughter)-** एतत् १९२८ तमे वर्षे लिखितं ३१ पत्राणां सङ्कलनम् अस्ति, यत् तेन दशवर्षीयायै इन्दिरायै लिखितम्। अस्मिन् सृष्टेः आरम्भः, जीवस्य विकासः, मानवसभ्यतायाः उदयः, भाषाणां धर्मस्य च विकासः अतीव सरलेन रूपेण सम्पादितः वर्तते।

### ३. नेहरूवर्यस्य साहित्यिक- विशेषताः भाषाशैली च-

नेहरूमहोदयस्य लेखनं तस्य व्यक्तित्वस्य दर्पणम् आसीत्। तस्य साहित्ये बहवः गुणाः आसन्। यद्यपि तेन गद्यं लिखितं, तथापि तस्य भाषायां एकं स्वाभाविकं सङ्गीतम्, लालित्यं, काव्यात्मकता च आसीत्। यदा सः हिमालयस्य वर्णनं करोति, अथवा गङ्गानद्याः तरङ्गाणां वर्णनं करोति, तदा तस्य भाषा कवेः इव उत्तुङ्गशिखरं स्पृशति।तस्य साहित्ये अन्धविश्वासस्य, रूढिवादितायाः च स्थानं नास्ति। सः तार्किकदृष्ट्या इतिहासस्य विश्लेषणं करोति स्म, परन्तु तस्य केन्द्रे सदैव 'मानवः' तस्य सुख-दुःखं च आसीत्। वस्तुनिष्ठता तटस्थता चः इतिहासकाररूपेण सः पक्षपातरहितः आसीत्। सः भारतीयसंस्कृतेः गौरवं तु गायति स्म, परन्तु भारते व्याप्तायाः जातिव्यवस्थायाः, कूपमण्डूकतायाः आलोचनाम् अपि करोति स्म।

४. संस्कृतेन सह नेहरूमहोदयस्य सम्बन्धः अनुरागश्च श्लाघनीयः आसीत्। पण्डित जवाहरलालनेहरूः संस्कृतभाषायाः परमभक्तः, प्रशंसकश्च आसीत्। 'भारतस्य अन्वेषणम्' ग्रन्थे तेन संस्कृतभाषायाः विषये यत् लिखितं, तत् प्रत्येकं भारतीयेभ्यः गौरवास्पदं वर्तते।सः अलिखत्- "संस्कृतभाषा एका अद्भुता, समृद्धा, अतीव वैज्ञानिकी च भाषा अस्ति। अस्याः शब्दसामर्थ्यं, व्याकरणं च अद्वितीयं वर्तते। यावत्पर्यन्तं भारतस्य इयं देववाणी जिवन्ती अस्ति, तावत्पर्यन्तं भारतस्य आत्मा अमरः अस्ति।" नेहरूवर्यस्य प्रयासेन एव स्वतन्त्रभारते 'राष्ट्रिय- संस्कृत- संस्थानम्' तथा संस्कृतस्य संवर्धनाय विभिन्नाः योजनाः आरब्धाः अभवन्। सः मन्यते स्म यत् भारतस्य सांस्कृतिकं गौरवम् संस्कृतवाङ्मये एव सुरक्षितम् अस्ति।

### ५. साहित्यिकसंस्थानां स्थापनायाम् योगदानम्-

स्वतन्त्रभारतस्य प्रधानमन्त्री भूत्वा नेहरूमहोदयेन देशे साहित्यिक- सांस्कृतिक- वातावरणस्य निर्माणाय कश्चन महान् प्रबन्धः कृतः आसीत्। तस्यैव दूरदर्शितया भारतसर्वकारेण तिसृणां प्रमुखाणां राष्ट्रियसंस्थानां स्थापना कृता।

१. **साहित्य अकादमी (१९५४):** भारतीयभाषाणां साहित्यस्य विकासाय, अनुवादाय, लेखकानां प्रोत्साहनाय च अस्याः स्थापना कृता। नेहरूवर्यः अस्य प्रथमः अध्यक्षः आसीत्।

२. **ललित कला अकादमी** (१९५४: कलायाः संरक्षणाय एतस्य स्थापना अभवत्।

३. **सङ्गीत नाटक अकादमी** (१९५३): रङ्गमञ्चस्य, नृत्यस्य, सङ्गीतस्य च संवर्धनाय एतत् कार्यं करोति।

एतासां संस्थानां माध्यमेन तेन भारतीय- साहित्यकाराणां कृते एकं विश्वस्तरीयं मञ्चं प्रदत्तम्। अतः निष्कर्षरूपेण वयं वक्तुं शक्नुमो यत् साहित्यक्षेत्रे पण्डितजवाहरलालनेहरूमहोदयस्य योगदानं चिरस्मरणीयम् अस्ति। सः केवलं प्रधानमन्त्री नासीत्, अपि तु महान् 'दार्शनिकः अपि आसीत्। तस्य ग्रन्थाः अद्यापि विश्वस्य विचारकाणाम्, इतिहासकाराणां, साहित्यस्नेहीनां च कृते प्रकाशस्तम्भाः इव सन्ति। तस्य लेखनीतः प्रसृतं वाङ्मयम् मानवमूल्यानां, राष्ट्रियगौरवस्य, लोकतन्त्रस्य च महतीं सेवां अकरोत्। आधुनिकभारतस्य बौद्धिकचेतनायाः विकासे नेहरूमहोदयस्य साहित्यिकम् अवदानम् अद्वितीयं मन्यते।वयम् एतं महापुरुषं प्रति प्रणामांजलिं समर्पयामः। इत्यलम्।

# आपद्- प्रवाह- औन्यवृष्टि- पूर्वसिद्धता- समीक्षासभा एवं शासननिर्देशाः



**हिमसंस्कृतवार्ताः- राघव नाथ झा, मधुबनी।** भवननिर्माणविभागस्य माननीया मन्त्रिणी तथा जिलाप्रभारी लेशी सिंहमहोदयायाः अध्यक्षतायां आपद्- प्रवाह- औन्यवृष्टि- पूर्वसिद्धतासम्बद्धा समीक्षासभा सम्पन्ना। सभायां तया प्रतिपादितं यत् राज्यशासनं आपद्-प्रवाह-औन्यवृष्टिजन्यविपत्तीनां प्रभावं यथासम्भवं न्यूनीकर्तुं दृढसंकल्पं धारयति। आपत्काले जनसामान्याय शीघ्रराहत-व्यवस्थायाः सुनिश्चिततायै सर्वे विभागाः सततं सज्जाः कार्यरताश्च सन्ति। प्रभारीमन्त्रिणा जनप्रतिनिधिभिः प्रदत्तानां महत्त्वपूर्णसुझावानां कृते कृतज्ञता व्यक्ता। तया उक्तं यत् सर्वेषां समन्वयेनैव आपद्-प्रभावस्य न्यूनता सम्भवति। ग्रामसभा- आयोजनं, आपदा-प्रबन्धन-व्यवस्था च निर्णीतं यत् 30 मई 2026 दिनाङ्के सर्वेषु पंचायतक्षेत्रेषु विशेषग्रामसभाः आयोजिताः भविष्यन्ति। तासु "संपूर्ति-पोर्टल"-माध्यमेन वञ्चित- लाभुकानां नामसंयोजनं सूच्याः अद्यतनीकरणं च क्रियेत। औन्यवृष्टि-अल्पवृष्टि-स्थितौ कृषकहिताय वैकल्पिक- शस्ययोजनायाः शीघ्रं कार्यान्वयनं कर्तव्यम् इति निर्देशः प्रदत्तः। "नल- जल- योजना"- अन्तर्गतं अपूर्णवार्डेषु त्वरित- अभियानरूपेण कार्यं कृत्वा पूर्णता सुनिश्चितव्या। अपर-समाहर्त्रा (आपदा) द्वारा प्रस्तुतीकरणे सूचितं यत् मधुबनी- जिला अष्टादश-नदीप्रवाहयुक्तः अतिसंवेदनशीलप्रदेशः अस्ति। नदीनां जलस्तर- निरीक्षणं त्रिघण्टान्तराले क्रियते। मौसम- विज्ञान- केन्द्रानुसारं जूनतः सितम्बरपर्यन्तं वर्षापातः सामान्यस्तरात् न्यूना सम्भाव्यते। ग्रामीणकार्यविभागेन त्रिसहस्राधिक-षट्शतानि (3069) सेतुपुलिनां स्वच्छता सम्पन्ना, शेषकार्यं प्रगतिपथे अस्ति। नव-निर्मितेषु आपदाश्रय-गृहेषु अष्टगृहाणि पूर्णानि, शेषाणां कार्यं प्रचलति।स्वास्थ्यविभागेन औषधिभण्डारणं, जीवनरक्षकौषधानां, हैलोजन- टेबलेटानां, ब्लीचिङ्ग- द्रव्याणां च पर्याप्तव्यवस्था सुनिश्चितीकृता। आपद्ग्रस्तक्षेत्रेषु चिकित्सादलानां प्रतिनियुक्तिः कृताः। जलसंसाधनविभागाय नहराणां अन्तिमसीमापर्यन्तं जलप्रवाहस्य सुनिश्चिततायाः निर्देशः दत्तः। कृषिसिंचनव्यवस्थायाः सुदृढीकरणं कर्तव्यम् इति आदेशः प्रदत्तः। जिलायां त्रिशताधिक-नवति (290) आपदा-मित्राः प्रशिक्षिताः सन्ति। त्रिषष्टिसहस्राधिक- सप्तशत- षड्विंशति (67320) पॉलीथिनशीटाः सञ्चिताः सन्ति। द्विशताधिक-चत्वारिंशत् (242) आपदाश्रय- स्थलानि चिन्हितानि, यत्र चतुर्नवति- सहस्राधिक- जनानां (97023) निवासव्यवस्था सम्भाविता। सामुदायिक- रसोईकेन्द्राणि एकत्रिंशत्- त्रिशत् (231) स्थानेषु स्थापितानि सन्ति। जिलाधिकारी आनन्दशर्मा-महोदयेन उक्तं यत् ग्रामसभामाध्यमेन वञ्चितजनानां नामसंयोजनं शीघ्रं कृत्वा आपद्कालीन-राहत-व्यवस्था सुदृढा भविष्यति। अन्ते प्रभारीमन्त्रिणा सम्पूर्ण-जिलाप्रशासनस्य पूर्वसिद्धता प्रशंसिता तथा उक्तं यत् समन्वितप्रयत्नेन आपद्-प्रभावः निश्चितरूपेण न्यूनीकर्तुं शक्यते।

# वैदिकपरम्परायाम् अधिकमासस्य सामाजिक-आध्यात्मिक-शास्त्रीयमहत्त्वविषये राष्ट्रिय ई-संगोष्ठी सुसम्पन्ना

**हिमसंस्कृतवार्ता।** महर्षि महेश योगी वैदिक विश्वविद्यालय, संस्कृत संस्कृति विकास संस्थान तथा विश्व वैदिक सेवा संस्थानम् इत्येतेषां संयुक्ततत्त्वावधानेन अधिकज्येष्ठमास-शुक्ल-दशम्यां तिथौ गङ्गादशम्युपलक्ष्ये दिनाङ्के 25/05/2026 सोमवासरे अपराह्ने 04 वादनादारभ्य वेदविभागे "वैदिकपरम्परायाम् अधिकमासस्य (पुरुषोत्तममासस्य) सामाजिक-आध्यात्मिक-शास्त्रीयमहत्त्वम्" इति विषये एकदिवसीया राष्ट्रिय ई-संगोष्ठी सफलतया सुसम्पन्ना। अस्याः संगोष्ठ्याः अध्यक्षता आदरणीयेन प्रो.(डॉ.)नरेशकुमारतिवारीमहोदयेन(कुलगुरुः,म.म.यो.वै.वि, म.प्र)कृता तथा श्रीसंदीपशर्ममहोदयस्य (कुलसचिवः,म.म.यो.वै.वि,म.प्र) मार्गदर्शने कार्यक्रमः सुसम्पन्नः।अस्यां संगोष्ठ्यां मुख्यातिथिरूपेण डॉ. कृष्णकुमारभार्गव महोदयः (राष्ट्रीय सहसचिवः, संस्कृतसंस्कृतिविकाससंस्थानम्) तथा विशिष्टातिथिरूपेण प्रो. मानवेन्द्रपाण्डेयमहोदयः (विभागाध्यक्षः, ज्योतिषविभागः,म.म.यो.वै.वि, म.प्र) उपस्थितौ आस्ताम्।कार्यक्रमस्य शुभारम्भः वैदिकगुरुपूजनेन अभवत्। एतत् पूजनकार्यं श्रीस्वतंत्रद्विवेदीमहोदयेन तथा श्रीबृजेशकुमारमिश्रमहोदयेन कारितम्। ततः परं वैदिकमङ्गलाचरणं वेदविभागस्य शास्त्रीतृतीयवर्षस्य श्रीब्रजकिशोरशुक्लः, श्रीराजकिशोरशुक्लः तथा श्रीपुष्पेन्द्रशर्मा इत्येतैः छात्रैः कृतम्। लौकिकमङ्गलाचरणरूपेण "गङ्गादेवीस्तुतिः" सुश्री विष्णुप्रिया इन्दिरा इत्यनया प्रस्तुता।अतिथिपरिचयं स्वागतभाषणञ्च योगविभागाध्यक्षेन डॉ. नित्येश्वरचतुर्वेदी, योगविभागाध्यक्षः,म.म.यो.वै.वि, म.प्र)महोदयेन प्रस्तुतम्। श्रीराजनकुमारचतुर्वेदी महोदयः (सचिवः, विश्व वैदिक सेवा संस्थानम्) कार्यक्रमस्य विषयप्रस्तावनां प्रस्तूय अवदत् यत् वर्तमानकालस्य सामाजिकसमस्यानां समाधानं वैदिकपरम्परायाः पालनद्वारा कर्तुं शक्यते।मुख्यातिथिः डॉ. कृष्णकान्तभार्गव महोदयः अवदत् यत् अधिकमासः भारतीयसंस्कृतेः वैज्ञानिक-आध्यात्मिकदृष्टेः अद्भुतम् उदाहरणम् अस्ति, यः समाजं नैतिकतां धर्मं च प्रति प्रेरयति।विशिष्टातिथिः प्रो. मानवेन्द्रपाण्डेय महोदयः



वैदिकज्योतिषे धर्मशास्त्रेषु च अधिकमासस्य प्रासङ्गिकतां प्रकाशयन् कालगणनाविषये विस्तृतं विवेचनं कृतवान्।कार्यक्रमाध्यक्षः आदरणीयः कुलगुरुः प्रो.(डॉ.) नरेशकुमारतिवारी महोदयः स्वीयाध्यक्षीयभाषणे अधिकमासं भारतीयकालगणनायाः आध्यात्मिकसाधनायाश्च सुव्यवस्थितपरम्परा इति निरूपितवान्। तेन ज्ञानस्य विज्ञानेन सह सम्बन्धः सरलरीत्या प्रतिपादितः। महोदयेन उक्तं यत् एषः मासः आत्मशुद्धये, संयमाय, सांस्कृतिकजागरणाय च विशेषम् अवसरं ददाति।आभारप्रदर्शनं वेदविभागाध्यक्षेन कार्यक्रमसमन्वयकेन च डॉ. आलोकचन्द्रपरिडा महोदयेन कृतम्। ततः परं कार्यक्रमस्य सहसंयोजकेन शोधसमन्वयकेन च डॉ. चन्द्रशेखरमिश्रमहोदयेन वैदिकशान्तिपाठः कृतः।कार्यक्रमे सहसमन्वयकत्वेन डॉ. देवव्रतपाराशर महोदयः, सहसंयोजकरूपेण डॉ. खुशेन्द्रदेवचतुर्वेदीमहोदयः, डॉचन्द्रशेखरमिश्रवर्यः, श्रीअभिषेकतिवारीमहोदयः,श्रीरङ्गनाथशुक्लमहोदयाश्च उपस्थिताः आसन्।वेद विज्ञान संकायस्य श्रीध्रुवकुमारपाठक, श्रीहरिनारायणशर्मा, श्रीदीपकपाण्डेय प्रभृतयः शिक्षकाः सर्वे छात्राश्च उपस्थिताः आसन्।अस्यां राष्ट्रिय ई-संगोष्ठ्यां देशस्य विभिन्नप्रदेशेभ्यः विद्वांसः, आचार्याः, शोधार्थिनः, छात्राश्च उत्साहपूर्वकं सहभागीभूताः। कार्यक्रमस्य सञ्चालनं डॉ. रमाशर्मा महोदया (अध्यक्षा, गुरुकुलप्रकल्पः, संस्कृत संस्कृति विकास संस्थान, मध्यप्रदेश) सम्यक् रूपेण अकरोत्। सर्वेषां प्रत्यक्ष-परोक्षसहयोगेन एषा एकदिवसीया राष्ट्रिय ई-संगोष्ठी सफलतया सम्पन्ना इति शम्।

## "लौकिकन्यायकोशः"
## "अपसारिताग्निभूतलन्यायः"



भूतले वर्तमानम् अग्निम् अन्यत्र स्थापयामः चेत् पूर्वस्थले कञ्चित् कालं यावत् उष्णता भवत्येव। तथैव कोऽपि मनुष्यः स्वस्थानात् अन्यत् स्थानं प्रति नीतः तथापि तस्य गुणानां कश्चन प्रभावः पूर्वस्थाने भवत्येव।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य जगति अनेकाः विचित्राः घटनाः घटिताः सन्ति। प्रथमा वार्ता फ्रान्सदेशात् अस्ति। तत्र रेलयाने वातानुकूलनयन्त्रं न अभूत्। तत्र तीव्रोष्णाधिक्येन यात्रिकैः श्वासग्रहणे कष्टम् अनुभूतम्, रेलयानात् बहिः च अवतीर्णम्।

**नन्दिनी-** आम्, एतत् कष्टकरं वृत्तं मया अपि श्रुतम्। शीतलेषु देशेषु एतादृशः घर्मः जनानां कृते असह्यः भवति। एतादृश्याम् आपदि ते मार्गपार्श्वे अवतीर्णवन्तः सन्ति। जापानदेशे भूकम्प- पीडितानां शिशूनां मोदाय एकं विमानपत्तनं पोकेमोन्- अनुकूलं परिवर्तितम्।

**काव्या-** सत्यम्! शिशूनां दुःख-निवारणाय एतादृशं सुन्दरं कार्यं तैः कृतम्। एषः विषयः अतीव श्लाघनीयः अभूत्। अधुना तृतीया वार्ता अमेरिका- देशस्य सन्त-पौल-नगरात् अस्ति। तत्र आरक्षकैः मार्गे वाहनं निरुद्धम्। तस्मिन् समये वाहने स्थितेन एकेन अर्भकेण शिशु-वस्त्र-स्यूतात् सगुलिका-भुशुण्डी निष्कासिता!

**नन्दिनी-** अहो! एषा वार्ता तु अत्यन्तं भयङ्करी अस्ति। तस्मिन् समये सः अर्भकः सुरक्षितः अभूत् इति देवस्य एव महाकृपा। पित्रा तस्मिन् शिशु- स्यूते घातकम् आयुधं किमर्थं स्थापितम्? एषः तु घोरः अपराधः पित्रा कृतः।